# Ekadanta Stotram

## ॥ श्री एकदन्त स्तोत्रम् ॥

मदासुरं सुशान्तं वै दृष्ट्वा विष्णुमुखाः सुराः ।

भृग्वादयश्च मुनय एकदन्तं समाययुः ॥ १ ॥

*madāsuraṁ suśāntaṁ vai dr̥ṣṭvā viṣṇumukhāḥ surāḥ |*

*bhr̥gvādayaśca munaya ēkadantaṁ samāyayuḥ || 1 ||*

మదాసురం సుశాంతం వై దృష్ట్వా విష్ణుముఖాః సురాః |

భృగ్వాదయశ్చ మునయ ఏకదంతం సమాయయుః || ౧ ||

மதா³ஸுரம் ஸுஶாந்தம் வை த்³ருஷ்ட்வா விஷ்ணுமுகா²: ஸுரா: ।

ப்⁴ருக்³வாத³யஶ்ச முனய ஏகத³ந்தம் ஸமாயயு: ॥ 1 ॥

**Meaning**: The demigods, whose faces were like those of Lord Viṣṇu, saw the demon Madasura well calmed down.

Bhr̥gu and other sages approached Ekadantha.

---

प्रणम्य तं प्रपूज्यादौ पुनस्तं नेमुरादरात् ।

तुष्टुवुर्हर्षसम्युक्ता एकदन्तं गणेश्वरम् ॥ २ ॥

*praṇamya taṁ prapūjyādau punastaṁ nēmurādarāt |*

*tuṣṭuvurharṣasamyuktā ēkadantaṁ gaṇēśvaram || 2 ||*

ప్రణమ్య తం ప్రపూజ్యాదౌ పునస్తం నేమురాదరాత్ |

తుష్టువుర్హర్షసంయుక్తా ఏకదంతం గణేశ్వరమ్ || ౨ ||

ப்ரணம்ய தம் ப்ரபூஜ்யாதௌ³ புனஸ்தம் நேமுராத³ராத் ।

துஷ்டுவுர்ஹர்ஷஸம்யுக்தா ஏகத³ந்தம் க³ணேஶ்வரம் ॥ 2 ॥

**Meaning**: They bowed down to him and worshiped him, and again they bowed down to him with reverence.

Overjoyed they praised the one-toothed Lord of the Gandharvas.

---

# देवर्षय ऊचुः

सदात्मरूपं सकलादिभूत

-ममायिनं सोऽहमचिन्त्यबोधम् ।

अनादिमध्यान्तविहीनमेकं

तमेकदन्तं शरणं व्रजामः ॥ ३ ॥

*sadātmarūpaṁ sakalādibhūta*

*-mamāyinaṁ sō:'hamacintyabōdham |*

*anādimadhyāntavihīnamēkaṁ*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 3 ||*

సదాత్మరూపం సకలాదిభూత

-మమాయినం సోఽహమచింత్యబోధమ్ |

అనాదిమధ్యాంతవిహీనమేకం

తమేకదంతం శరణం వ్రజామః || ౩ ||

ஸதா³த்மரூபம் ஸகலாதி³பூ⁴த

-மமாயினம் ஸோ(அ)ஹமசிந்த்யபோ³த⁴ம் ।

அனாதி³மத்⁴யாந்தவிஹீனமேகம்

தமேகத³ந்தம் ஶரணம் வ்ரஜாம: ॥ 3 ॥

**Meaning**: The eternal form of the whole and the beginning

-My magician is that I am unthinkable.

One without beginning and middle

We take refuge in Him who has one tooth.

---

अनन्तचिद्रूपमयं गणेशं

ह्यभेदभेदादिविहीनमाद्यम् ।

हृदि प्रकाशस्य धरं स्वधीस्थं

तमेकदन्तं शरणं व्रजामः ॥ ४ ॥

*anantacidrūpamayaṁ gaṇēśaṁ*

*hyabhēdabhēdādivihīnamādyam |*

*hr̥di prakāśasya dharaṁ svadhīsthaṁ*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 4 ||*

అనంతచిద్రూపమయం గణేశం

హ్యభేదభేదాదివిహీనమాద్యమ్ |

హృది ప్రకాశస్య ధరం స్వధీస్థం

తమేకదంతం శరణం వ్రజామః || ౪ ||

அனந்தசித்³ரூபமயம் க³ணேஶம்

ஹ்யபே⁴த³பே⁴தா³தி³விஹீனமாத்³யம் ।

ஹ்ருதி³ ப்ரகாஶஸ்ய த⁴ரம் ஸ்வதீ⁴ஸ்த²ம்

தமேகத³ந்தம் ஶரணம் வ்ரஜாம: ॥ 4 ॥

**Meaning**: Ganesha in the form of infinite mind

It is the first without differences and differences.

The holder of light in the heart is in his own mind

We take refuge in Him who has one tooth.

विश्वादिभूतं हृदि योगिनां वै

प्रत्यक्षरूपेण विभान्तमेकम् ।

सदा निरालम्ब-समाधिगम्यं

तमेकदन्तं शरणं व्रजामः ॥ ५ ॥

*viśvādibhūtaṁ hr̥di yōgināṁ vai*

*pratyakṣarūpēṇa vibhāntamēkam |*

*sadā nirālamba-samādhigamyaṁ*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 5 ||*

విశ్వాదిభూతం హృది యోగినాం వై

ప్రత్యక్షరూపేణ విభాంతమేకమ్ |

సదా నిరాలంబ-సమాధిగమ్యం

తమేకదంతం శరణం వ్రజామః || ౫ ||

விஶ்வாதி³பூ⁴தம் ஹ்ருதி³ யோகி³னாம் வை

ப்ரத்யக்ஷரூபேண விபா⁴ந்தமேகம் ।

ஸதா³ நிராலம்ப³-ஸமாதி⁴க³ம்யம்

தமேகத³ந்தம் ஶரணம் வ்ரஜாம: ॥ 5 ॥

**Meaning**: It is the origin of the universe in the hearts of the yogis

One that shines in a direct form.

Always accessible to unconstrained meditation

We take refuge in Him who has one tooth.

---

स्वबिम्बभावेन विलासयुक्तं

बिन्दुस्वरूपा रचिता स्वमाया ।

तस्यां स्ववीर्यं प्रददाति यो वै

तमेकदन्तं शरणं व्रजामः ॥ ६ ॥

*svabimbabhāvēna vilāsayuktaṁ*

*bindusvarūpā racitā svamāyā |*

*tasyāṁ svavīryaṁ pradadāti yō vai*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 6 ||*

స్వబింబభావేన విలాసయుక్తం

బిందుస్వరూపా రచితా స్వమాయా |

తస్యాం స్వవీర్యం ప్రదదాతి యో వై

తమేకదంతం శరణం వ్రజామః || ౬ ||

ஸ்வபி³ம்ப³பா⁴வேன விலாஸயுக்தம்

பி³ந்து³ஸ்வரூபா ரசிதா ஸ்வமாயா ।

தஸ்யாம் ஸ்வவீர்யம் ப்ரத³தா³தி யோ வை

தமேகத³ந்தம் ஶரணம் வ்ரஜாம꞉ ॥ 6 ॥

**Meaning**: luxurious in its sense of imagery

She created her own illusion in the form of a dot.

He who gives his strength to her

We take refuge in Him who has one tooth.

---

त्वदीय-वीर्येण समस्तभूता

माया तया संरचितं च विश्वम् ।

नादात्मकं ह्यात्मतया प्रतीतं

तमेकदन्तं शरणं व्रजामः ॥ ७ ॥

*tvadīya-vīryēṇa samastabhūtā*

*māyā tayā saṁracitaṁ ca viśvam |*

*nādātmakaṁ hyātmatayā pratītaṁ*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 7 ||*

త్వదీయ-వీర్యేణ సమస్తభూతా

మాయా తయా సంరచితం చ విశ్వమ్ |

నాదాత్మకం హ్యాత్మతయా ప్రతీతం

తమేకదంతం శరణం వ్రజామః || ౭ ||

த்வதீ³ய-வீர்யேண ஸமஸ்தபூ⁴தா

மாயா தயா ஸம்ரசிதம் ச விஶ்வம் ।

நாதா³த்மகம் ஹ்யாத்மதயா ப்ரதீதம்

தமேகத³ந்தம் ஶரணம் வ்ரஜாம꞉ ॥ 7 ॥

**Meaning**: By your power all beings

Maya and the universe created by her.

For it is perceived as self-contained by sound

We take refuge in Him who has one tooth.

---

त्वदीय-सत्ताधरमेकदन्तं

गणेशमेकं त्रयबोधितारम् ।

सेवन्त आपूर्यमजं त्रिसंस्था-

स्तमेकदन्तं शरणं व्रजामः ॥ ८ ॥

*tvadīya-sattādharamēkadantaṁ*

*gaṇēśamēkaṁ trayabōdhitāram |*

*sēvanta āpūryamajaṁ trisaṁsthā-*

*stamēkadantaṁ śaraṇaṁ vrajāmaḥ || 8 ||*

త్వదీయ-సత్తాధరమేకదంతం

గణేశమేకం త్రయబోధితారమ్ |

సేవంత ఆపూర్యమజం త్రిసంస్థా-

స్తమేకదంతం శరణం వ్రజామః || ౮ ||

த்வதீ3ய-ஸத்தாத4ரமேகத3ந்தம்

க3ணேஶமேகம் த்ரயபோ3தி4தாரம் ।

ஸேவந்த ஆபூர்யமஜம் த்ரிஸம்ஸ்தா2-

ஸ்தமேகத3ந்தம் ஶரணம் வ்ரஜாம*:* ॥ *8* ॥

**Meaning**: Your-being-bearer of one tooth

Ganesha is one of the three enlighteners.

Sevanta apuryamajam trisanstha-

We take refuge in Him who has one tooth.

---

ततस्त्वया प्रेरित एव नाद-

स्तेनेदमेवं रचितं जगद्वै ।

आनन्दरूपं समभावसंस्थं

तमेकदन्तं शरणं व्रजामः ॥ ९ ॥

*tatastvayā prērita ēva nāda-*

*stēnēdamēvaṁ racitaṁ jagadvai |*

*ānandarūpaṁ samabhāvasaṁsthaṁ*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 9 ||*

తతస్త్వయా ప్రేరిత ఏవ నాద-

స్తేనేదమేవం రచితం జగద్వై |

ఆనందరూపం సమభావసంస్థం

తమేకదంతం శరణం వ్రజామః || ౯ ||

ததஸ்த்வயா ப்ரேரித ஏவ நாத$^{3}$-

ஸ்தேனேத$^{3}$மேவம் ரசிதம் ஜக$^{3}$த்$^{3}$வை ।

ஆனந்த$^{3}$ரூபம் ஸமபா$^{4}$வஸம்ஸ்த$^{2}$ம்

தமேகத$^{3}$ந்தம் ஶரணம் வ்ரஜாம꞉ ॥ 9 ॥

**Meaning**: Then you inspired the sound-

This is how the universe was created by the thief.

The form of bliss is established in equality

We take refuge in Him who has one tooth.

---

तदेव विश्वं कृपया तवैव

सम्भूतमाद्यं तमसा विभातम् ।

अनेकरूपं ह्यजमेकभूतं

तमेकदन्तं शरणं व्रजामः ॥ १० ॥

*tadēva viśvaṁ kr̥payā tavaiva*

*sambhūtamādyaṁ tamasā vibhātam |*

*anēkarūpaṁ hyajamēkabhūtaṁ*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 10 ||*

తదేవ విశ్వం కృపయా తవైవ

సంభూతమాద్యం తమసా విభాతమ్ |

అనేకరూపం హ్యజమేకభూతం

తమేకదంతం శరణం వ్రజామః || ౧౦ ||

ததே³வ விஶ்வம் க்ருபயா தவைவ

ஸம்பூ⁴தமாத்³யம் தமஸா விபா⁴தம் ।

அனேகரூபம் ஹ்யஜமேகபூ⁴தம்

தமேகத³ந்தம் ஶரணம் வ்ரஜாம꞉ ॥ *10* ॥

**Meaning**: That is the universe by your grace

The original universe was illuminated by darkness.

The many forms of the sacrifice are one

We take refuge in Him who has one tooth.

---

ततस्त्वया प्रेरितमेव तेन

सृष्टं सुसूक्ष्मं जगदेकसंस्थम् ।

सत्वात्मकं श्वेतमनन्तमाद्यं

तमेकदन्तं शरणं व्रजामः ॥ ११ ॥

*tatastvayā prēritamēva tēna*

*sr̥ṣṭaṁ susūkṣmaṁ jagadēkasaṁstham |*

*sattvātmakaṁ śvētamanantamādyaṁ*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 11 ||*

తతస్త్వయా ప్రేరితమేవ తేన

సృష్టం సుసూక్ష్మం జగదేకసంస్థమ్ |

సత్త్వాత్మకం శ్వేతమనంతమాద్యం

తమేకదంతం శరణం వ్రజామః || ౧౧ ||

ததஸ்த்வயா ப்ரேரிதமேவ தேன

ஸ்ருஷ்டம் ஸூஸூக்ஷ்மம் ஜக³தே³கஸம்ஸ்த²ம் ।

ஸத்த்வாத்மகம் ஶ்வேதமனந்தமாத்³யம்

தமேகத³ந்தம் ஶரணம் வ்ரஜாம꞉ ॥ 11 ॥

**Meaning**: Then you were inspired by him

The created universe is very subtle and is situated in one place.

The white, infinite, original, consisting of Sattva

We take refuge in Him who has one tooth.

---

तदेव स्वप्नं तपसा गणेशं

संसिद्धिरूपं विविधं बभूव ।

सदेकरूपं कृपया तवाऽपि

तमेकदन्तं शरणं व्रजामः ॥ १२ ॥

*tadēva svapnaṁ tapasā gaṇēśaṁ*

*saṁsiddhirūpaṁ vividhaṁ babhūva |*

*sadēkarūpaṁ kr̥payā tavā:'pi*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 12 ||*

తదేవ స్వప్నం తపసా గణేశం

సంసిద్ధిరూపం వివిధం బభూవ |

సదేకరూపం కృపయా తవాఽపి

తమేకదంతం శరణం వ్రజామః || ౧౨ ||

ததே³வ ஸ்வப்னம் தபஸா க³ணேஶம்

ஸம்ஸித்³தி⁴ரூபம் விவித⁴ம் ப³பூ⁴வ ।

ஸதே³கரூபம் க்ருபயா தவா(அ)பி

தமேகத³ந்தம் ஶரணம் வ்ரஜாம꞉ ॥ 12 ॥

**Meaning**: That is the dream of Ganesha by austerities

The form of perfection became various.

Always in the same form, please, too

We take refuge in Him who has one tooth.

---

सम्प्रेरितं तच्च त्वया हृदिस्थं

तथा सुदृष्टं जगदंशरूपम् ।

तेनैव जाग्रन्मयमप्रमेयं

तमेकदन्तं शरणं व्रजामः ॥ १३ ॥

*samprēritaṁ tacca tvayā hr̥disthaṁ*

*tathā sudr̥ṣṭaṁ jagadaṁśarūpam |*

*tēnaiva jāgranmayamaprамēyaṁ*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 13 ||*

సంప్రేరితం తచ్చ త్వయా హృదిస్థం

తథా సుదృష్టం జగదంశరూపమ్ |

తేనైవ జాగ్రన్మయమప్రమేయం

తమేకదంతం శరణం వ్రజామః || ౧౩ ||

ஸம்ப்ரேரிதம் தச்ச த்வயா ஹ்ருதி3ஸ்த2ம்

ததா2 ஸுத்3ருஷ்டம் ஜக3த3ம்ஶரூபம் ।

தேனைவ ஜாக்3ரன்மயமப்ரமேயம்

தமேகத3ந்தம் ஶரணம் வ்ரஜாம: ॥ 13 ॥

**Meaning**: And that which you have inspired is in your heart

and well-seen form of the universe.

By that, the awakening is immeasurable

We take refuge in Him who has one tooth.

---

जाग्रत्स्वरूपं रजसा विभातं

विलोकितं तत्कृपया तथैव ।

तदा विभिन्नं भवदेकरूपं

तमेकदन्तं शरणं व्रजामः ॥ १४ ॥

*jāgratsvarūpaṁ rajasā vibhātaṁ*

*vilōkitaṁ tatkr̥payā tathaiva |*

*tadā vibhinnaṁ bhavadēkarūpaṁ*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 14 ||*

జాగ్రత్స్వరూపం రజసా విభాతం

విలోకితం తత్కృపయా తథైవ |

తదా విభిన్నం భవదేకరూపం

తమేకదంతం శరణం వ్రజామః || ౧౪ ||

ஜாக்³ரத்ஸ்வரூபம் ரஜஸா விபா⁴தம்

விலோகிதம் தத்க்ருபயா ததை²வ ।

ததா³ விபி⁴ன்னம் ப⁴வதே³கரூபம்

தமேகத³ந்தம் ஶரணம் வ்ரஜாம꞉ ॥ 14 ॥

**Meaning**: The awake form is illuminated by dust

It was kindly observed that it was the same.

Then different becomes one form

We take refuge in Him who has one tooth.

---

एवं च सृष्ट्वा प्रकृतिस्वभावा-

त्तदन्तरे त्वं च विभासि नित्यम् ।

बुद्धिप्रदाता गणनाथ एक-

स्तमेकदन्तं शरणं व्रजामः ॥ १५ ॥

*ēvaṁ ca sr̥ṣṭvā prakr̥tisvabhāvā-*

*ttadantarē tvaṁ ca vibhāsi nityam |*

*buddhipradātā gaṇanātha ēka-*

*stamēkadantaṁ śaraṇaṁ vrajāmaḥ || 15 ||*

ఏవం చ సృష్ట్వా ప్రకృతిస్వభావా-

త్తదంతరే త్వం చ విభాసి నిత్యమ్ |

బుద్ధిప్రదాతా గణనాథ ఏక-

స్తమేకదంతం శరణం వ్రజామః || ౧౫ ||

ஏவம் ச ஸ்ருஷ்ட்வா ப்ரக்ருதிஸ்வபா⁴வா-

த்தத³ந்தரே த்வம் ச விபா⁴ஸி நித்யம் ।

பு³த்³தி⁴ப்ரதா³தா க³ணனாத² ஏக-

ஸ்தமேகத³ந்தம் ஶரணம் வ்ரஜாம: ॥ 15 ॥

**Meaning**: thus creating the nature-

In the meantime, you’re always shining.

Buddhipradata Ganesha Ek-

We take refuge in Him who has one tooth.

---

त्वदाज्ञया भान्ति ग्रहाश्च सर्वे

नक्षत्ररूपाणि विभान्ति खे वै ।

आधारहीनानि त्वया धृतानि

तमेकदन्तं शरणं व्रजामः ॥ १६ ॥

*tvadājñayā bhānti grahāśca sarvē*

*nakṣatrarūpāṇi vibhānti khē vai |*

*ādhārahīnāni tvayā dhr̥tāni*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 16 ||*

త్వదాజ్ఞయా భాంతి గ్రహాశ్చ సర్వే

నక్షత్రరూపాణి విభాంతి ఖే వై |

ఆధారహీనాని త్వయా ధృతాని

తమేకదంతం శరణం వ్రజామః || ౧౬ ||

த்வதா³ஜ்ஞயா பா⁴ந்தி க்³ரஹாஶ்ச ஸர்வே

நக்ஷத்ரரூபாணி விபா⁴ந்தி கே² வை ।

ஆதா⁴ரஹீனானி த்வயா த்⁴ருதானி

தமேகத³ந்தம் ஶரணம் வ்ரஜாம: ॥ 16 ॥

**Meaning**: At your command all the planets shine

The forms of the stars are shining in the sky.

You have worn them without foundation

We take refuge in Him who has one tooth.

---

त्वदाज्ञया सृष्टिकरो विधाता

त्वदाज्ञया पालक एव विष्णुः ।

त्वदाज्ञया संहरको हरोऽपि

तमेकदन्तं शरणं व्रजामः ॥ १७ ॥

*tvadājñayā sr̥ṣṭikarō vidhātā*

*tvadājñayā pālaka ēva viṣṇuḥ |*

*tvadājñayā saṁharakō harō:’pi*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 17 ||*

త్వదాజ్ఞయా సృష్టికరో విధాతా

త్వదాజ్ఞయా పాలక ఏవ విష్ణుః |

త్వదాజ్ఞయా సంహారకో హరోఽపి

తమేకదంతం శరణం వ్రజామః || ౧౭ ||

த்வதா³ஜ்ஞயா ஸ்ருஷ்டிகரோ விதா⁴தா

த்வதா³ஜ்ஞயா பாலக ஏவ விஷ்ணு꞉ ।

த்வதா³ஜ்ஞயா ஸம்ஹாரகோ ஹரோ(அ)பி

தமேகத³ந்தம் ஶரணம் வ்ரஜாம꞉ ॥ 17 ॥

**Meaning**: Creator who created by your command

By your command, Lord Vishnu is the protector.

Even the destroyer Haro at your command

We take refuge in Him who has one tooth.

---

यदाज्ञया भूर्जलमध्यसंस्था

यदाज्ञयाऽपः प्रवहन्ति नद्यः ।

सीमां सदा रक्षति वै समुद्र-

स्तमेकदन्तं शरणं व्रजामः ॥ १८ ॥

*yadājñayā bhūrjalamadhyasaṁsthā*

*yadājñayā:'paḥ pravahanti nadyaḥ |*

*sīmāṁ sadā rakṣati vai samudra-*

*stamēkadantaṁ śaraṇaṁ vrajāmaḥ || 18 ||*

యదాజ్ఞయా భూర్జలమధ్యసంస్థా

యదాజ్ఞయాఽపః ప్రవహంతి నద్యః |

సీమాం సదా రక్షతి వై సముద్ర-

స్తమేకదంతం శరణం వ్రజామః || ౧౮ ||

யதா³ஜ்ஞயா பூ⁴ர்ஜலமத்⁴யஸம்ஸ்தா²

யதா³ஜ்ஞயா(அ)ப: ப்ரவஹந்தி நத்³ய: ।

ஸீமாம் ஸதா³ ரக்ஷதி வை ஸமுத்³ர-

ஸ்தமேகத³ந்தம் ஶரணம் வ்ரஜாம: ॥ *18* ॥

**Meaning**: By whose command the earth is in the midst of water

By His command the waters of the rivers flow.

The sea always protects the border-

We take refuge in Him who has one tooth.

---

यदाज्ञया देवगणो दिविस्थो

ददाति वै कर्मफलानि नित्यम् ।

यदाज्ञया शैलगणोऽचलो वै

तमेकदन्तं शरणं व्रजामः ॥ १९ ॥

*yadājñayā dēvagaṇō divisthō*

*dadāti vai karmaphalāni nityam |*

*yadājñayā śailagaṇō:'calō vai*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 19 ||*

యదాజ్ఞయా దేవగణో దివిస్థో

దదాతి వై కర్మఫలాని నిత్యమ్ |

యదాజ్ఞయా శైలగణోఽచలో వై

తమేకదంతం శరణం వ్రజామః || ౧౯ ||

யதா³ஜ்ஞயா தே³வக³ணோ தி³விஸ்தோ²

த³தா³தி வை கர்மப²லானி நித்யம் ।
யதா³ஜ்ஞயா ஶைலக³ணோ(அ)சலோ வை
தமேகத³ந்தம் ஶரணம் வ்ரஜாம: ॥ 19 ॥

**Meaning**: By whose command the gods are in heaven

He always gives the fruits of his actions.

By whose command the mountains were moved

We take refuge in Him who has one tooth.

---

यदाज्ञया शेष इलाधरो वै

यदाज्ञया मोहकरश्च कामः ।

यदाज्ञया कालधरोऽर्यमा च

तमेकदन्तं शरणं व्रजामः ॥ २० ॥

*yadājñayā śēṣa ilādharō vai*

*yadājñayā mōhakaraśca kāmaḥ |*

*yadājñayā kāladharō:'ryamā ca*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 20 ||*

యదాజ్ఞయా శేష ఇలాధరో వై

యదాజ్ఞయా మోహకరశ్చ కామః |

యదాజ్ఞయా కాలధరోఽర్యమా చ

తమేకదంతం శరణం వ్రజామః || ౨౦ ||

யதா³ஜ்ஞயா ஶேஷ இலாத⁴ரோ வை

யதா³ஜ்ஞயா மோஹகரஶ்ச காம: ।

யதா³ஜ்ஞயா காலத⁴ரோ(அ)ர்யமா ச

தமேகத³ந்தம் ஶரணம் வ்ரஜாம: ॥ 20 ॥

**Meaning**: By whose command the rest of the Iladharas

By His command lust is also deluding.

By whose command Kaladhar and Aryama

We take refuge in Him who has one tooth.

---

यदाज्ञया वाति विभाति वायु-

र्यदाज्ञयाऽग्निर्जठरादिसंस्थः ।

यदाज्ञया वै सचराऽचरं च

तमेकदन्तं शरणं व्रजामः ॥ २१ ॥

*yadājñayā vāti vibhāti vāyu-*

*ryadājñayā:'gnirjaṭharādisaṁsthaḥ |*

*yadājñayā vai sacarā:'caraṁ ca*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 21 ||*

యదాజ్ఞయా వాతి విభాతి వాయు-

ర్యదాజ్ఞయాఽగ్నిర్జఠరాదిసంస్థః |

యదాజ్ఞయా వై సచరాఽచరం చ

తమేకదంతం శరణం వ్రజామః || ౨౧ ||

யதா³ஜ்ஞயா வாதி விபா⁴தி வாயு-

ர்யதா³ஜ்ஞயா(அ)க்³னிர்ஜட²ராதி³ஸம்ஸ்த²: ।

யதா³ஜ்ஞயா வை ஸசரா(அ)சரம் ச

தமேகத³ந்தம் ஶரணம் வ்ரஜாம: ॥ 21 ॥

**Meaning**: By whose command the wind blows and shines-

By whose command the fire is situated in the stomach and other parts of the body.

By whose command I move and do not move

We take refuge in Him who has one tooth.

---

सर्वान्तरे संस्थितमेकगूढं

यदाज्ञया सर्वमिदं विभाति ।

अनन्तरूपं हृदि बोधकं वै

तमेकदन्तं शरणं व्रजामः ॥ २२ ॥

*sarvāntarē saṁsthitamēkagūḍhaṁ*

*yadājñayā sarvamidaṁ vibhāti |*

*anantarūpaṁ hr̥di bōdhakaṁ vai*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 22 ||*

సర్వాంతరే సంస్థితమేకగూఢం

యదాజ్ఞయా సర్వమిదం విభాతి |

అనంతరూపం హృది బోధకం వై

తమేకదంతం శరణం వ్రజామః || ౨౨ ||

ஸர்வாந்தரே ஸம்ஸ்தி²தமேககூ³டா⁴ம்

யதா³ஜ்ஞயா ஸர்வமித³ம் விபா⁴தி ।

அனந்தரூபம் ஹ்ருதி³ போ³த⁴கம் வை

தமேகத³ந்தம் ஶரணம் வ்ரஜாம꞉ ॥ 22 ॥

**Meaning**: One mystery situated in all

By His command all this shines.

The infinite form is the signifier in the heart

We take refuge in Him who has one tooth.

---

यं योगिनो योगबलेन साध्यं

कुर्वन्ति तं कः स्तवनेन स्तौति ।

अतः प्रमाणेन सुसिद्धिदोऽस्तु

तमेकदन्तं शरणं व्रजामः ॥ २३ ॥

*yaṁ yōginō yōgabalēna sādhyaṁ*

*kurvanti taṁ kaḥ stavanēna stauti |*

*ataḥ pramāṇēna susiddhidō:’stu*

*tamēkadantaṁ śaraṇaṁ vrajāmaḥ || 23 ||*

యం యోగినో యోగబలేన సాధ్యం

కుర్వంతి తం కః స్తవనేన స్తౌతి |

అతః ప్రమాణేన సుసిద్ధిదోఽస్తు

తమేకదంతం శరణం వ్రజామః || ౨౩ ||

யம் யோகி³னோ யோக³ப³லேன ஸாத்⁴யம்

குர்வந்தி தம் க꞉ ஸ்தவனேன ஸ்தௌதி ।

அத꞉ ப்ரமாணேன ஸுஸித்³தி⁴தோ³(அ)ஸ்து

தமேகத³ந்தம் ஶரணம் வ்ரஜாம꞉ ॥ 23 ॥

**Meaning**: which is achievable by the yogi by the power of yoga

Who can praise Him with praise when they do so?

Therefore, let him be well-accomplished by proof

We take refuge in Him who has one tooth.

---

## गृत्समद उवाच –

एवं स्तुत्वा च प्रह्लाद देवाः समुनयश्च वै ।

तूष्णीं भावं प्रपद्यैव ननृतुर्हर्षसम्युताः ॥ २४ ॥

*ēvaṁ stutvā ca prahlāda dēvāḥ samunayaśca vai |*

*tūṣṇīṁ bhāvaṁ prapadyaiva nanṛturharṣasamyutāḥ || 24 ||*

ఏవం స్తుత్వా చ ప్రహ్లాద దేవాః సమునయశ్చ వై |

తూష్ణీం భావం ప్రపద్యైవ ననృతుర్హర్షసంయుతాః || ౨౪ ||

ஏவம் ஸ்துத்வா ச ப்ரஹ்லாத³ தே³வா꞉ ஸமுனயஶ்ச வை ।

தூஷ்ணீம் பா⁴வம் ப்ரபத்³யைவ நன்ருதுர்ஹர்ஷஸம்யுதா꞉ ॥ 24 ॥

**Meaning**: O Prahlāda Mahārāja, the demigods and sages thus praised the Lord.

They remained silent and danced with great joy

---

स तानुवाच प्रीतात्मा ह्येकदन्तः स्तवेन वै ।

जगाद तान्महाभागान्देवर्षीन्भक्तवत्सलः ॥ २५ ॥

*sa tānuvāca prītātmā hyēkadantaḥ stavēna vai |*

*jagāda tānmahābhāgāndēvarṣīnbhaktavatsalaḥ || 25 ||*

స తానువాచ ప్రీతాత్మా హ్యేకదంతః స్తవేన వై |

జగాద తాన్మహాభాగాన్దేవర్షీన్భక్తవత్సలః || ౨౫ ||

ஸ தானுவாச ப்ரீதாத்மா ஹ்யேகத³ந்த꞉ ஸ்தவேன வை ।

ஜகா³த³ தான்மஹாபா⁴கா³ந்தே³வர்ஷீன்ப⁴க்தவத்ஸல꞉ ॥ 25 ॥

**Meaning**: Pleased with himself, the one-toothed Lord spoke to them in praise.

Lord Kṛṣṇa, who is very affectionate to His devotees, spoke to those most fortunate demigods and sages.

---

## एकदन्त उवाच –

प्रसन्नोऽस्मि च स्तोत्रेण सुराः सर्षिगणाः किल ।

शृणु त्वं वरदोऽहं वो दास्यामि मनसीप्सितम् ॥ २६ ॥

*prasannō:'smi ca stōtrēṇa surāḥ sarṣigaṇāḥ kila |*

*śṛṇu tvaṁ varadō:'haṁ vō dāsyāmi manasīpsitam || 26 ||*

ప్రసన్నో ఉస్మి చ స్తోత్రేణ సురాః సర్షిగణాః కిల |

శృణు త్వం వరదో ఉహం వో దాస్యామి మనసీప్సితమ్ || ౨౬ ||

ப்ரஸன்னோ(அ)ஸ்மி ச ஸ்தோத்ரேண ஸுராꞏ ஸர்ஷிக³ணாꞏ கில ।

ஶ்ருணு த்வம் வரதோ³(அ)ஹம் வோ தா³ஸ்யாமி மனஸீப்ஸிதம் ॥ 26 ॥

**Meaning**: O demigods and sages, I am pleased with your prayers.

O bestower of boons, please hear me. I shall give you whatever you desire.

---

भवत्कृतं मदीयं वै स्तोत्रं प्रीतिप्रदं मम ।

भविष्यति न सन्देहः सर्वसिद्धिप्रदायकम् ॥ २७ ॥

*bhavatkṛtaṁ madīyaṁ vai stōtraṁ prītipradaṁ mama |*

*bhaviṣyati na sandēhaḥ sarvasiddhipradāyakam || 27 ||*

భవత్కృతం మదీయం వై స్తోత్రం ప్రీతిప్రదం మమ |

భవిష్యతి న సందేహః సర్వసిద్ధిప్రదాయకమ్ || ౨౭ ||

ப⁴வத்க்ருதம் மதீ³யம் வை ஸ்தோத்ரம் ப்ரீதிப்ரத³ம் மம ।

ப⁴விஷ்யதி ந ஸந்தே³ஹꞏ ஸர்வஸித்³தி⁴ப்ரதா³யகம் ॥ 27 ॥

**Meaning**: The prayer you have composed for me is very pleasing to me.

It will undoubtedly be the bestower of all perfections.

---

यं यमिच्छति तं तं वै दास्यामि स्तोत्र पाठतः ।

पुत्रपौत्रादिकं सर्वं लभते धनधान्यकम् ॥ २८ ॥

*yaṁ yamicchati taṁ taṁ vai dāsyāmi stōtra pāṭhataḥ |*

*putrapautrādikaṁ sarvaṁ labhatē dhanadhānyakam || 28 ||*

యం యమిచ్ఛతి తం తం వై దాస్యామి స్తోత్రపాఠతః |

పుత్రపౌత్రాదికం సర్వం లభతే ధనధాన్యకమ్ || ౨౮ ||

யம் யமிச்ச²தி தம் தம் வை தா³ஸ்யாமி ஸ்தோத்ர பாட²த: ।

புத்ரபௌத்ராதி³கம் ஸர்வம் லப⁴தே த⁴னதா⁴ன்யகம் ॥ 28 ॥

**Meaning**: By reciting this stotra I shall give whatever one desires.

He obtains sons and grandsons, wealth and grain.

---

गजाश्वादिकमत्यन्तं राज्यभोगं लभेद्ध्रुवम् ।

भुक्तिं मुक्तिं च योगं वै लभते शान्तिदायकम् ॥ २९ ॥

*gajāśvādikamatyantaṁ rājyabhōgaṁ labhēddhruvam |*

*bhuktiṁ muktiṁ ca yōgaṁ vai labhatē śāntidāyakam || 29 ||*

గజాశ్వాదికమత్యంతం రాజ్యభోగం లభేద్ధ్రువమ్ |

భుక్తిం ముక్తిం చ యోగం వై లభతే శాంతిదాయకమ్ || ౨౯ ||

க³ஜாஶ்வாதி³கமத்யந்தம் ராஜ்யபோ⁴க³ம் லபே⁴த்³த்⁴ருவம் ।

பு⁴க்திம் முக்திம் ச யோக³ம் வை லப⁴தே ஶாந்திதா³யகம் ॥ 29 ॥

**Meaning**: He will certainly enjoy the kingdom with elephants and horses.

By practicing yoga, which brings peace, one attains bliss and liberation.

---

मारणोच्चाटनादीनि राज्यबन्धादिकं च यत् ।

पठतां शृण्वतां नृणां भवेच्च बन्धहीनता ॥ ३० ॥

*māraṇōccāṭanādīni rājyabandhādikaṁ ca yat |*

*paṭhatāṁ śr̥ṇvatāṁ nr̥ṇāṁ bhavēcca bandhahīnatā || 30 ||*

మారణోచ్చాటనాదీని రాజ్యబంధాదికం చ యత్ |

పఠతాం శృణ్వతాం నృణాం భవేచ్చ బంధహీనతా || ౩౦ ||

மாரணோச்சாடனாதீ³னி ராஜ்யப³ந்தா⁴தி³கம் ச யத் ।

பட²தாம் ஶ்ருண்வதாம் ந்ருணாம் ப⁴வேச்ச ப³ந்த⁴ஹீனதா ॥ 30 ॥

**Meaning**: Killing, tearing down, imprisonment of the kingdom, etc.

Those who read and hear this scripture will become free from bondage.

---

एकविंशतिवारं च श्लोकांश्चैवैकविंशतिम् ।

पठते नित्यमेवं च दिनानि त्वेकविंशतिम् ॥ ३१ ॥

*ēkaviṁśativāraṁ ca ślōkāṁścaivaikaviṁśatim |*

*paṭhatē nityamēvaṁ ca dināni tvēkaviṁśatim || 31 ||*

ఏకవింశతివారం చ శ్లోకాంశ్చైవైకవింశతిమ్ |

పఠతే నిత్యమేవం చ దినాని త్వేకవింశతిమ్ || ౩౧ ||

ஏகவிம்ஶதிவாரம் ச ஶ்லோகாம்ஶ்சைவைகவிம்ஶதிம் ।

பட²தே நித்யமேவம் ச தி³னானி த்வேகவிம்ஶதிம் ॥ 31 ॥

**Meaning**: Twenty-one times and twenty-one verses.

He recites this mantra daily for twenty-one days.

---

न तस्य दुर्लभं किञ्चित्त्रिषु लोकेषु वै भवेत् ।

असाध्यं साधयेन्मर्त्यः सर्वत्र विजयी भवेत् ॥ ३२ ॥

*na tasya durlabhaṁ kiñcittriṣu lōkēṣu vai bhavēt |*

*asādhyaṁ sādhayēnmartyaḥ sarvatra vijayī bhavēt || 32 ||*

న తస్య దుర్లభం కించిత్త్రిషు లోకేషు వై భవేత్ |

అసాధ్యం సాధయేన్మర్త్యః సర్వత్ర విజయీ భవేత్ || ౩౨ ||

ந தஸ்ய து³ர்லப⁴ம் கிஞ்சித்த்ரிஷு லோகேஷு வை ப⁴வேத் ।

அஸாத்⁴யம் ஸாத⁴யேன்மர்த்ய꞉ ஸர்வத்ர விஜயீ ப⁴வேத் ॥ 32 ॥

**Meaning**: There is nothing rare for him in the three worlds.

A mortal who achieves the impossible will be victorious everywhere.

---

नित्यं यः पठते स्तोत्रं ब्रह्मभूतः स वै नरः ।

तस्य दर्शनतः सर्वे देवाः पूता भवन्ति वै ॥ ३३ ॥

*nityaṁ yaḥ paṭhatē stōtraṁ brahmabhūtaḥ sa vai naraḥ |*

*tasya darśanataḥ sarvē dēvāḥ pūtā bhavanti vai || 33 ||*

నిత్యం యః పఠతే స్తోత్రం బ్రహ్మభూతః స వై నరః |

తస్య దర్శనతః సర్వే దేవాః పూతా భవంతి వై || ౩౩ ||

நித்யம் ய꞉ பட²தே ஸ்தோத்ரம் ப்³ரஹ்மபூ⁴த꞉ ஸ வை நர꞉ ।

தஸ்ய த³ர்ஶனத꞉ ஸர்வே தே³வா꞉ பூதா ப⁴வந்தி வை ॥ 33 ॥

**Meaning**: He who recites this stotra daily is a man who has become Brahman.

By seeing the Supreme Personality of Godhead all the demigods are purified.

---

एवं तस्य वचः श्रुत्वा प्रहृष्टा देवतर्षयः ।

ऊचुः करपुटाः सर्वे भक्तियुक्ता गजाननम् ॥ ३४ ॥

*ēvaṁ tasya vacaḥ śrutvā prahr̥ṣṭā dēvatarṣayaḥ |*

*ūcuḥ karapuṭāḥ sarvē bhaktiyuktā gajānanam || 34 ||*

ఏవం తస్య వచః శ్రుత్వా ప్రహృష్టా దేవతర్షయః |

ఊచుః కరపుటాః సర్వే భక్తియుక్తా గజాననమ్ || ౩౪ ||

ஏவம் தஸ்ய வச꞉ ஶ்ருத்வா ப்ரஹ்ருஷ்டா தே³வதர்ஷய꞉ ।

ஊசு꞉ கரபுடா꞉ ஸர்வே ப⁴க்தியுக்தா க³ஜானநம் ॥ 34 ॥

**Meaning**: The sages of the gods were delighted to hear these words of the Lord.

With folded hands they all addressed Lord Gajanana with devotion.

इती श्री एकदन्तस्तोत्रं सम्पूर्णम् ॥

*itī śrī ēkadantastōtraṁ sampūrṇam* ||

ఇతీ శ్రీ ఏకదంతస్తోత్రం సంపూర్ణమ్ ||

இதீ ஶ்ரீ ஏகத³ந்தஸ்தோத்ரம் ஸம்பூர்ணம் ॥

**Meaning**: This is the complete Sri Ekadantha Stotram.